अन्वेषणा वर्ष:- ३, अङ्क:-३, २०८२ सत्यापिता, विज्ञसमीक्षिता, नेप्जोल-सुचीकृता पत्रिका (जर्नल) ISSN:-3021-9485(P)

# शिवपुराणोक्तशैवसाधना शैवदर्शनञ्च

सहप्राध्यापकः, उदयराजः सुवेदी
Email : udayaraj.subedi640@gmail.com

**सारसङ्क्षेपः**

प्रस्तुतेऽस्मिन् लेखे योगाचार्यस्य भगवतः शिवस्य महन्महत्त्वं तत्सम्बद्धा विविधाः साधनाश्च प्रतिपादिताः सन्ति। एवञ्च शिवपुराणानुसारेण शिवस्य कति मूर्तयो शैवसाधनासम्बद्धानामाचार्याणामैतिह्यं तेषां चिन्तनञ्च प्रस्तुतमस्ति। एवञ्च माहेश्वरसाधनमार्गे वामाचारस्योत्तरोत्तरह्रासेन शिवतत्त्वस्य क्रमिकविकासेन च माहेश्वराणां कापालिकः, कालदमनम्, पाशुपतः, शैवश्चेति मतचतुष्टयं प्रचलितम्। उपासनापद्धतेः पार्थक्येन तेषां मतानां दार्शनिकस्वरूपं भेदं लभते। शोधप्रबन्धेऽस्मिन् तस्य साङ्गोपाङ्गविवेचनं बिहाय केवलं भक्तिरसदृष्ट्यैव तस्य स्वरूपं निरूप्यते। एतस्य लेखस्याध्ययनेन विशेषतोऽनधीतपुराणविषयास्तदध्ययने समुत्सुकाश्च जना लाभान्विता भविष्यन्ति।

**शब्दकुञ्जी :** योगः, साधना, कापालिकः, दर्शनम्, ब्रह्मतत्त्वम्।

## विषयप्रवेशः

शिवपुराणे शिवसम्बन्धिनां ब्रतोपवास, पूजापद्धति, तपस्या योगसाधनादीनां वर्णनं महदुत्कृष्टं विद्यते। प्रसङ्गतो ब्रह्माण्ड, भारतवर्ष, द्वीप, ग्रहस्थिति, कश्यपपत्नीनामपत्यवर्णनमिक्ष्वाकुवंश, मनुवंशवर्णनं च मनोहरं विद्यते। जनसाधारणानामशिवं शमयितुं शिवमाहात्म्यप्रतिपादकस्य शिवपुराणस्य पठन-पाठन-श्रवण-मननैः विविधतापसन्तप्तानां प्राणिनां स्वान्ते शान्तिरुपजायते। अत एव वहवो मनीषिणः सांसारिकं प्रपञ्चमपहाय गाढभक्तिपुरःसरं शिवाराधनपरायणा ऐहलौकिकं पारलौकिकं चाभिष्टं लभमाना अमन्दमानन्दमनुभवन्तोऽहर्निशं भगवतो निटिलेश्वरस्य गुणगणान् गायमाना लोककल्याणं कुर्वन्ति।

शिवपुराणं सप्तसु संहितासु विभक्तमस्ति। तत्र वायवीयसंहिताया महद् वैशिष्ट्यम्। वायवीयसंहितायां शैवतन्त्रसम्बद्धाया उपासनापद्धतेर्विशदं विवेचनं विद्यते। शैवागमसिद्धान्तानां निरुपणं शैवतान्त्रिकाणां मनसो विनोदाय परमं साधनमुपयोगि च वर्तते। एवं शिवपुराणे तान्त्रिकतायाः पूर्णः प्रभावो लक्ष्यते। शिवस्य प्रतियुगं शिवावतारवर्णनम्, शैवावरणपूजायाः क्रमः, पञ्चाक्षरमन्त्रजपविधिः, सपरिकरशिवलिङ्गप्रतिष्ठाविधानम्, शैवागमोक्तायाः पूजापद्धतेश्च विवेचनं सम्यगस्ति। ऋषिभ्यः शैवं ज्ञानं दत्वा शिवसन्निधिगमनादिवर्णनं शिवभक्तानां महानुल्लासकरो विद्यते। शिवपुराणस्याश्रयः सर्वेषां प्राणिनां महानुपकारी शिवभक्तिसाधकः सकलतापवारकश्चेतिसिद्धान्तितम्। अतः अस्मिन्नाऽलेखे शिवपुराणस्य वायवीयसंहिताभ्यन्तरे उपर्युक्तविषयाणां सम्यक् व्याख्यानं, विश्लेषणं चर्चा च कृता अस्ति।

## अध्ययनविधिः

अत्र पुस्तकालयेषूलब्धग्रन्थानामाधारेण लेख्यसामग्रीसङ्कलनपूर्वकं सम्बद्धविषयस्याध्ययनं विहितमस्ति। अस्यालेखस्याध्ययनविधौ वर्णनात्मकविधेर्विवेचनात्मकविधेश्च प्रयोगो विद्यते। विषयस्रोतस्तु संस्कृतवाङ्मयसम्बद्धाः

पौराणिकग्रन्थाः सन्ति । अधीतविषयवस्तूनां सम्बद्धग्रन्थानामाधारेण विश्लेषणपूर्वकं निष्कर्षोपस्थापनञ्चात्र विहितमस्ति। विशेषत आलेखेस्मिन् पारम्परिकी पद्धतिरेवालम्बितास्ति।

## समस्याकथनम्

अस्मिन् शोधलेखे माहेश्वरसाधनामार्गे शिवस्य कति मूर्तयो वर्णिताः सन्ति ? कापालिकादिकानां दार्शनिकस्वरुपं भेदञ्च किदृशम् ? शिवपुराणानुसारेण योगाचार्याणामितिहास कीदृशः ?, किं नाम योगः ? तस्य किं महत्त्वम् ? इत्यादि समस्यामूलकान् शोधप्रश्नान् पुरस्कृत्य शोधलेखोऽयं प्रस्तुतो विद्यते।

## उद्देश्यकथनम्

उपर्युक्तां प्रश्नात्मिकीं प्राज्ञिकीं शोधसमस्यां पुरस्कृत्य शोधकार्यमिदं सम्पादितमस्ति। तत्रोपासनापद्धतेः पार्थक्येन माहेश्वरसाधनामार्गे कापालिकादिकानां दार्शनिकस्वरुपं भेदञ्च विलिख्य तेषां समाधानमेव शोधलेखस्योद्देश्यमस्ति । लेखस्यास्य सहयोगेन संस्कृतज्ञपाठकाः, इतिहाससम्बद्धविद्यार्थिनश्च सम्बद्धविषयस्य सरलतया ज्ञानं कर्तुं प्रभविष्यन्ति।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

श्रीशिवपुराणान्तर्गतस्य वायवीयसंहिता अस्य विषयक्षेत्रम् । महर्षिवेदव्यासेन प्रणीते शिवपुराणे नानाविषयसम्बद्धेषु अनेके विषया वर्तन्ते । परन्त्वस्मिन् लघ्वालेखे तस्य पूर्णाध्ययनमसम्भवम् । किन्तु लेखशीर्षकाधारेण तस्य विषयस्य मूलभूतरूपेण अध्ययनस्य कृतेऽत्र निश्चितो वर्तते। तस्मादेतावदेवास्यानुसन्धानस्य क्षेत्रं सीमा च विद्यते। प्रथमतस्तु माहेश्वराणां कापालिकः, कालदमनम्, पाशुपतः, शैवश्चेति मतचतुष्टयानां परिचय महत्तायाः प्रतिपादनं क्रियते।

## शिवस्याष्टमूर्तयः

शिवपुराणे वायवीयसंहितायामुत्तरभागे तृतीयाऽध्याये शिवस्याष्टमूर्तयो वर्णिताः सन्ति । परमशैवो विप्रर्षिरुपमन्युः श्रीकृष्णमवदत् – तस्य देवादिदेवस्याष्टमूर्तिमयं निखिलमिदं जगदष्टमूर्तिभिः सूत्रं मणिगणैरिव व्याप्तं वर्तते। ता अष्टमूर्तयो यथा – शर्वो भवो रुद्रो भीमः पशुपतिरीशानो महादेवश्चेति प्रसिद्धाः। प्रोक्ताः शर्वाद्यष्टमूर्तयो यथाक्रमं क्षितिजलाग्निवाय्वाकाशक्षेत्रज्ञसूर्यचन्द्रेष्वधिष्ठिताः। (३।१७–१९)। अयमेव शास्त्रनिश्चयो यत्परमात्मनः पृथिवीरूपिणी शर्वनाम्नी मूर्तिः स्थावरजङ्गमात्मकं विश्वं धारयति। जलरूपिणी भवनाम्नी द्वितीयमूर्तिः समस्तजगतां जीवान् रक्षति। (३।२०–२१)। रुद्रस्याघोररूपिणी शुभकरी तेजोमयी रुद्रनाम्नी मूर्तिजगतो बाह्यमाभ्यन्तरञ्च व्याप्य तिष्ठति । वेधा उग्रस्य पवनात्मकमूर्त्यां विश्वमिदं स्पन्दयन् धारयति स्वयं च स्पन्दते, पण्डितस्तां मूर्तिम् उग्र इत्याख्ययाह्वति । (३।२२–२३) । सर्वावकाशदायिका गगनमयी भीमस्य 'भीम'नाम्नी मूर्तिः सर्वभूतानां भेदं साधयन्त्यखिलं विश्वं व्याप्य तिष्ठति। सर्वक्षेत्रनिवासिनः सर्वक्षेत्रज्ञस्य जीवात्मनोऽधिष्ठात्री पशुपतेः 'पशुपति'नाम्नी षष्ठमूर्तिः पशूनामर्थाद् बद्धजीवानं पाशं छिनत्ति। (३।२४–२५)। निखिलजगतां प्रकाशिका दिवाकररूपा महेशस्य 'ईशान' नामिका मूर्तिराकाशे सूर्यरूपेण विराजते। तस्य च 'महादेव' नामिका मूर्तिश्चन्द्रस्य सुधांशुवर्षणेनाखिलभुव नानन्दोत्पादनं करोति। (३।२६–२७) परमात्मनः शिवस्याष्टममूर्तिर्महादेवः स्वकीयापरसप्तमूर्तिनां व्यापकत्वेन विश्वं शिवात्मकं सम्पादयति । यथा वृक्षमूलसेचनेन फलपुष्पपत्रशाखादीनां पुष्टिर्जायते, तथा शिवपूजनेन तस्य

जगद्रूपशरीरस्य पुष्टिर्जायते (३।२७–२९)।

**कपालसाधना**

तन्त्रसाधनायां वाममार्गिसाधकानां (अघोरसाधकानां) कृते कापालिकः शब्दः प्रयुज्यते। कपालं धरतीति कापालिकमतस्य सम्बन्धः प्रतिपाद्यते। सम्भवतोऽस्मादेव कारणात् कृष्णचतुर्दश्यां तिथौ काश्मीरशैवसाधकैर्नृत्य–गीत–सुरा–सुन्दरीणामुन्मुक्तविहारद्वारा शिवस्योन्मत्तता प्रदश्यते । कापालिकसाधनायां साधकस्य शरीरमेव 'वज्रधरः', जगतः कापि स्त्री कपालवनिता 'सोऽहं' रूपमेव च हेरुकभगवद्मूर्तिः स्वीक्रियते। कापालिकसाधनायां वज्र पद्म–मदनं चेति त्रिरत्नं स्वीक्रियते । वज्रयानसाधनायां शैवकापालिकसाधनायां च भोगपरकयोगसाधना स्वीकृत्य स्त्रीपुरुषयोः स्थूलशरीरसंयोग एव सामरस्यमिति कथ्यते। स्थूलशरीरसंयोगोऽयं पञ्चपवित्राऽऽकर्षणस्य तथा ऊर्ध्वचालनस्य साधनं वर्तते, येन शरीरं वज्रवदचलायते। (नाथसम्प्रदाय पृष्ठ ८६) अस्मिन्नेव प्रसङ्गे अमरौली–वज्रौली–सहजौलीमुद्राणामुद्भावनाऽभूत् । (हठयोगप्रदीकायाम् पृष्ठ ९२) नाडीषु चक्रेषु च विश्वासः, शिवजीवयोरभिन्नता, योगद्वारा इन्द्रियनिग्रहपूर्वकंकैवल्यरूपे समवस्थितस्य शिवरूपस्यऽऽत्मनः साक्षात्कारः, शक्तियुक्तशिवस्य प्रभविष्णुतायां परमविश्वासः, पञ्चामृतविधानमित्यादिकापालिकमते प्रसिद्धम्। कापालिकमते शक्तिविवर्जितः शिवोऽपि शवतां प्राप्नोति।

शिवोऽपि शवतां याति कुण्डलिनीविवर्जितः। (देवीभागवतम्)

शक्त्या युक्तः शिव एव कर्तुमकर्तुमन्यथाकर्तुञ्च समर्थो भवति।

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्।
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि॥ (सौन्दर्यलहरी १)

शक्तिविरहितः शिवस्तु निष्क्रियो निरञ्जन एव, अत एव सोमसिद्धान्तिनां मते 'उमया सहितो रुद्रः' एव 'सोमः' कथ्यते। तन्मते उमाशिवौ मिथुनरूपावेव उपास्यौ भवतः। तन्मते प्रथमानन्दः, परमानन्दः, विरमानन्दः, सहजानन्दश्चेत्यानन्दस्य कोटिचतुष्टयं वर्तते। तत्र सहजानन्द एव परमसुखमस्ति।

**कालदमनसाधना**

आचारदृष्ट्या कालदमनसाधकोऽपि कापालिकसाधकसदृश एव वाममार्गी धवति । तन्मते रुद्ररूपेण परमेश्वरः स्वीक्रियन्ते । तन्मतानुसारेण कपालभोजनं, चिताभस्मलेपनम्, चिताभस्मसेवनम्, दण्डधारणम्, सुरापात्रधारणम्, सुरापात्रे भैरवपूजनञ्चेति षडाचाराः सर्वेषां लौकिकपारलौकिककामानां प्रापणायामोद्यसाभनानि सन्ति।

**पाशुपतसाधना**

पाशुपतसाधकानां मते कार्यम्, कारणम्, योगः, विधिः, दुःखान्तश्चेति पञ्चपदार्थाः स्वीक्रियन्ते। तत्र जीवो जडश्च कार्यं परमात्मा च कारण वर्तते। मतेऽस्मिन् जीवः पशुरूपेण, जडः पाशरूपेण परमात्मा च पतिरूपेण स्वीकृतः। चित्तद्वारा पशुपत्योश्च संयोग एव योगः कथ्यते। पतिप्राप्त्युपायः, पतिपूजा, पतिप्रसन्नतायैर्नृत्यगानप्रभृतिर्विधीयते। दुःखानामात्यन्तिकनिवृत्तिर्दुःखान्तो मोक्षो वा कथ्यते। एतत्सर्वं विशदरूपेण महेश्वरविरचिते पाशुपतसूत्रे वर्णितम्, यस्य कौण्डिन्यविरचितपञ्चमार्थिभाष्यं विद्यते।

## शैवसाधना

शैवसाधनायां पशुः पतिः पाशश्चेति तत्त्वत्रयं परमतत्त्वरूपेण स्वीकृतम् । तत्रेश्वरः पतिरूपेण जीवश्च पशुरूपेण स्वीकृतः । तत्र पशुः (जीवः) अज्ञोऽणुरूपश्च वर्तते । जीवरूपपशुः कर्म–मल–माया–रोधशक्तिरूपेण पाशचतुष्टयेन निबद्धस्तिष्ठति । स च पत्युरनुग्रहेण बन्धनात् प्रमुच्यते । प्रोक्तपाशचतुष्टयराहित्यमेव जीवस्य मुक्तावस्था कथ्यते ।

## शैवदर्शनम्

शैवमते आगमशास्त्रम्, स्पन्दशास्त्रम्, प्रत्यभिज्ञाशास्त्रञ्चेति शास्त्रत्रयं प्रसिद्धं वर्तते । अपि च शैवदर्शनस्याभेदः, भेदः, भेदाभेदश्चेति पक्षत्रयमिति, परा अपरा परात्परा चेत्यवस्थात्रयमिति, वाञ्छा–ज्ञान–क्रिया चेति शक्तित्रयमिति, पश्यन्तीमध्यमा वैखरी चेति वाक् त्रयमिति त्रयस्त्रिकमिदं दर्शनेऽस्मिन् प्रसिद्धम् । तस्मादिदं त्रिकदर्शनमित्यप्युच्यते । अत्र सामरसस्य महत्त्वं वर्तते । यथा सांख्यदर्शने प्रकृतिः सर्वथा ईश्वरनिरपेक्षा तथा त्रिकदर्शने नास्नि, न चाद्वैतवेदान्तसदृशं निष्क्रियं ब्रह्म स्वीकृतम्, अपि तु तत्र मानवस्वभावस्य सर्वे पक्षाः प्रस्तूयन्ते । यतो हि तद्दर्शनानुसारेण चैतन्यस्वरूपः शिवः प्रत्येकवस्तुना सह तादात्म्य स्थापयित्वा ज्ञानं कारयति, स्वशक्त्या सह लीलारतत्वेन प्रीतिं प्रबोधयति, तथाऽऽप्रतिहतेच्छाशक्तिश्चोत्पादयति जीवे । काश्मीरशैवसाधनायां भक्तिरसोपासनाया रहस्यमिदमेव वर्तते । संभाव्यते यत् काश्मीरशैवदर्शनस्य प्रोक्तसिद्धान्त एव भक्तिकालिकसाधनायां ज्ञान–कर्म–भक्तिरूपेण, शील–शक्ति–सौन्दर्यरूपेण योग–ज्ञानभक्तिरूपेण परिणतो भूत्वाऽभिनवत्रिकदर्शनरूपेण पल्लवितो वभूव । ज्ञानयोगाभ्यां सह भक्तेः शीलशक्तिभ्यां सह सौन्दर्यस्य सम्मिश्रणेन स्वभावतो भक्तिरससाधनायाः प्रशस्तमार्गः सिध्यति ।

शैवदर्शने भारतीयजीवन–कला–साहित्यादीनां दृष्ट्या द्वैतप्रतिपादकानां मालनीविश्वास–स्वच्छन्द विज्ञानभैरवानन्दभैरव–मृगेन्द्र कामिकारुद्र–यामलादीनां शैवागमानां महत्तवपूर्णं स्थानं वर्तते । शैवदर्शनानुसारेण ह्येकत्रिंशत्तत्वानि यथा –

| | | |
|---|---|---|
| १ शिवः | २ शक्तिः | ३ सदाशिवः |
| ४ ईश्वरः | ५ विद्या | ६ पुरुषः |
| ७ माया | ८ कालः | ९ नियतिः |
| १० कला | ११ अविद्या | १२ रागः |
| १३ प्रकृतिरव्यक्तं वा | १४ महत् | १५ अहंकारः |
| १६ मनः | १७–२१ पञ्चज्ञानेन्द्रियाणि | २२–२६ पञ्चकर्मेन्द्रियाणि |
| २७–३१ पञ्चतन्मात्रा | ३२–३६ पञ्चमहाभूतानि । | |

साकल्येन षट्त्रिंशत् इति ।

तथापि यथोक्तं महार्थमञ्जरी (पृ ५०) टीकाकारेणाष्टमादीनि (८–१२) पञ्चतत्त्वानि केवलं मायाया विभूतिरूपाणीति शक्यानीहागणयितुमिति प्राप्यतेऽत्रापेक्षितैकत्रिंशत्संख्या । तत्र राग–शिव–शक्तिप्रभृतितत्त्वानामुद्भावनाद्वारा कालान्तरे विकासशीले भक्तिरसे शिवशक्त्योः सामरसस्य मनोहरः सन्निवेशः प्राप्यते ।

## काश्मीरशैवमत ईश्वराद्वयवादः

वाममार्गिरुद्रोपासनायाः विभत्सपद्धतेर्विरुद्धत्वेन कश्मीरे यो धर्मः प्रादुर्भूतः स एव काश्मीरशैवमतम्, तस्य सिद्धान्तश्चेश्वराद्वयवाद इति कथ्यते। शाङ्कराद्वैतवादेन प्रभाविते मतेऽस्मिन् शिवस्य प्रधानता वर्तते, सत्यं शिवं सुन्दरमिति च सर्वमेकमेकाकारतयाऽद्वैतब्रह्मरूपेण शिवस्यावतारणा बभूव। तस्य प्रवत्र्तकश्च वसुगुप्ताचार्य आसीत्। स्वसिद्धान्तप्रतिपादकं शिवसूत्रं तेन रचितम्। काश्मीरशैवसिद्धान्तानुसारेण ईश्वरः सर्वस्वतन्त्रः कत्र्तृस्वरूपो वर्तते, मायातस्य स्वतन्त्रशक्तिरस्ति। ईश्वरः स्वेच्छया नटवल्लौलाविस्ताराय तां मायां नियोजयति। तस्याश्च माध्यमेन स्वस्फुरणं करोति। विमर्श आत्मनः स्वभाव आन्तरधर्मो वा विद्यते। तत्र ज्ञानक्रिययोश्च भेदो नास्ति। उभयोरुन्मुखतैवेश्वरस्य 'इच्छा' वर्तते। कालान्तरे शैवमतस्य दार्शनिकपक्षसंस्थापनाय वसुगुप्तस्य शिष्येण श्रीकल्लहेण 'स्पन्दशास्त्रम्' श्रीसोमानन्देन च 'प्रत्यभिज्ञाशास्त्र'मिति रचितम्। तत्र स्पन्दमते ईश्वराद्वयत्यानुभूतिसाधनं तु ईश्वरदर्शनं, तद्द्वारा मलनिवारणं च वर्तते। परन्तु प्रत्यभिज्ञादर्शनेन ईश्वररूपेण स्वात्मनः प्रत्यभिज्ञैव अर्थात् स्वस्वरूपप्राप्तिद्वारा ईश्वराद्वयस्यानुभूतिर्भवति।

## स्पन्दशास्त्रस्य सिद्धान्तः

काश्मीरशैवमते स्पन्दवादस्य प्रतिष्ठापकः कल्लहाचार्य आसीत्। स्पन्दस्य शाब्दिकार्थस्तु कम्पनम्, गतिः, स्फुरणादिकञ्च भवति। शिवस्य प्रथमं स्फुरणं स्पन्द एव वर्तते। यदा शिवेनानुभूयते यदहमेव शिवोऽस्मि तदा तस्मिन् प्रथमं स्पन्दनं भवति, तदेव स्पन्दनं शिवतत्त्वमिति कथ्यते। यदाऽऽनन्दस्य बोधो जायते तदा शक्तितत्त्वस्य प्रधानता भवति। 'कामकलाविलासे' शिवशक्त्योरुभयोः कृते बिन्दुशब्दः प्रयुज्यते। तस्य श्वेतं रक्तञ्चेति रूपद्वयं भवति। बिन्दुरेव सृष्टेः कारणम्। शारदातिलकानुसारेण मानवशरीरेऽग्निः सोमश्चेति तत्त्वद्वयं भवति। तत्राग्निः सूर्यस्तथा सोमो निशाकरो वर्तते। सूर्यः दक्षिणभागे तिष्ठति, यः पिङ्गलेति कथ्यते, तथा सोमो वामपक्षे तिष्ठति, य इडेति कथ्यते। अत एव 'शारदातिलक' भाष्यकारेण शुक्रमग्निरूपं रक्तं चन्द्ररूपम् इत्यादिना बिन्दुनिरूपणं कृतम्। एवमेव सदा शिवे इच्छाशक्तेः,ईश्वरेज्ञानशक्तेः,शुद्धविद्यायांक्रियाशक्तेश्च प्रधान्यंभवति।शुद्धविद्यातः समारभ्यशिवतत्त्वपर्यन्तमूध्र्वगामी जीवः प्राप्तव्यतत्त्वं स्वात्मरूपेण गृह्णाति। एवञ्च तत्त्वस्य पूर्णरूपेणाऽऽत्मगतत्त्वम्, विषयस्य विषयिणि तादात्म्यम्, विश्वस्मिन् व्यक्तौ च समरसता सम्पादनमेव स्पन्दवादः। शैवसाधनायां स्पन्दवादो नूतनदार्शनिकविचारधारारूपेण समायातः। स्पन्दवादेनानेन महान् समन्वयोऽजनि। ज्ञानेन सह भक्तेस्तथा दर्शनेन सह भावनायाः सम्मिश्रणेनैव भक्तिरसस्रोतः प्रवहति।

## प्रत्यभिज्ञादर्शनस्य सिद्धान्तः

प्रत्यभिज्ञादर्शनानुसारेण साधको ज्ञातमेव वस्तु पुनर्ज्ञात्वा प्रसन्नो जायते। स गुरोः कृपयाऽद्वयेश्वरं सम्यक् ज्ञात्वा स्वाधीनीकरोति। तादृशावस्थायां तस्य सुमहानानन्दानुभावो भवति। इत्थञ्च प्रत्यभिज्ञादर्शनमद्वैते द्वैतस्य निर्गुणे सगुणस्य चाभिनवा मधुरकल्पना वर्तते। शैवमतस्य प्रत्यभिज्ञादर्शनमिदं वैष्णवानां द्वैताद्वैतमतसदृशमेव विद्यते। वैष्णवानां द्वैताद्वैतवादस्येव शैवानां प्रत्यभिज्ञादर्शनस्य 'ईश्वराद्वयवाद'स्याभ्यन्तरे भक्तेरद्वैतमूलकभावानां सन्निवेश्य शिवशक्त्योश्च सामरसस्य तादात्म्यस्य वाभिनवा सृष्टिरभूत्।

प्रत्यभिज्ञादर्शनानुसारेण दुःखस्याऽऽत्यन्तिकनिवृत्तिर्निरतिशयाऽऽनन्दस्य (मोक्षस्य) प्राप्तिश्च न केवलं

ज्ञानेन, न वा केवलं भक्त्या एव संभवति । अपि तु तयोः संयोगेन दुःखस्याऽऽत्यन्तिकनिवृत्तिर्भवति । यतो हि शुद्धभक्तौ द्वैतभावस्यापेक्षा भवति, तादृशावस्थायां मोहोदयस्य सम्भावना भवति, किन्तु ज्ञानिभक्तानां द्वैतभावे मोहोदयो न संभवति । अत एव मतेऽस्मिन् ज्ञानाश्रितभक्तितत्त्वस्येव प्राधान्यं भवति ।

## योगस्य शाब्दिकं स्वरूपम्

प्राचीने संस्कृतवाङ्मये योगशब्दो विभिन्नेषु व्यापकेषु अर्थेषु व्यवह्रियते । युजिर् योगे इति धातोः कर्तरि घञ् प्रत्ययेन निष्पन्नस्य योगशब्दस्यार्थः संयोगः । करणे घञि तु तदर्थो मेलको भवति । तथा च नर–नारायणयोः संयोगः, एकीकरणसामग्री वा योगशब्दार्थः । क्रियात्मकदृष्ट्या साधनस्यैव नाम योगः । एवञ्च नरस्य नारायणेन सहैक्यसंपादनाय यत्साधनमुपदिष्टं तदेव योगो नाम । वस्तुतो योगशब्दः एकाग्रतार्थकाद् युज् समाधौ इति धातोरेव निष्पद्यते । ततो हि अष्टाङ्गयोगेषु नियमतः चित्तस्यैकाग्रता अपेक्षितास्ति । युज्यते समाधत्तेऽनेनेति करणव्युपत्या साधितस्य योगशब्दस्य नरस्य नारायणेन सह सम्बन्धे सहायकत्वाद् योगस्य अष्टाङ्गयोग एवार्थः । भावव्युत्पत्त्या निष्पन्नस्य योगशब्दस्य मुख्योऽर्थः जीवस्य ईश्वरेण सह संयोग एव ।

## शिवपुराणे योगचर्चा

मन्त्रयोगः, स्पर्शयोगः, भावयोग, अभावयोगः महायोगश्चेति पञ्चधा योगः कथित । तत्र मन्त्रजपस्याभ्यासवशेन मन्त्रवाच्यार्थगोचरीभूता विक्षेपरहिता या मानसीवृत्तिः सा मन्त्रयोगः । प्राणायामयुक्ता सैव मनोवृत्तिः स्पर्शयोगः प्रोच्यते । स एव स्पर्शयोगरहितो भावयोगो निगद्यते । येन समस्तस्य विश्वस्य रूपमात्रावयवा विलीयन्ते सोऽभावयोगः प्रकीर्तितः, यतो हि तत्र विद्यमानस्यापि वस्तुनः आभासो न भवति । यत्र केवलं निरूपाधिकस्य शिवस्वभास्यैव चिन्तनं क्रिया सैव शिवमयी मनोवृत्तिर्महायोग उच्यते –

विरुद्धवृत्त्यन्तरस्य शिवे चित्तस्य निश्चला ।
या वृत्तिः सा समासेन योगः स खलु पञ्चधा ॥
मन्त्रयोगः स्पर्शयोगो भावयोगस्तथा परः ।
अभावयोगः सर्वेभ्यो महायोगः परो मतः ॥ (शिवपुराणम्र, उत्तरखण्डः ३७।६–७)

निरुद्धवृत्यन्तरस्य चित्तस्य शिवे या निश्चला वृत्तिः सा योगः प्रोच्यते । किञ्च तत्रैव दशम अध्याये सनातनो धर्मश्चतुर्भिः पादैः युक्तोऽस्ति । ते च चत्वारः पादाः ज्ञानं क्रिया चर्या योगश्च । तत्र योगस्य लक्षणं पूर्वोक्तेन मार्गेण तस्मिन् अवस्थितचेतसो वृत्यन्तरनिरोधो योगः अभिधीयते (शिवपुराणस्य वायवीयसंहितां उत्तरखण्डे १० अध्याये ३३ श्लोक) विचारे क्रियमाणे उभयोरेव लक्षणयोरेकत्रैव पर्यवसानं भवति । किञ्च शिवपुराणस्य माहेश्वरसंहितान्तर्गतकुमारखण्डे चित्तवृत्तिनिरोधाख्य एव योगः स्वीकृतोऽस्ती ।

## योगाचार्याणामितिहासः

यद्यपि योगाचार्याणामितिहास आधुनिकेतिहासवत् सुव्यवस्थितो नोपलभ्यते, नापि तेषां क्रमिकानि नामानि प्राप्यन्ते तथापि शिवपुराणे उपलभ्यनामानि अत्रोपस्थाप्यन्ते । समस्तेषु युगावर्तेषु योगाचार्यव्याजेन भगवतः शिवस्य केऽवतारा भवन्ति के च तेषां शिष्याः सन्तीति भगवता श्रीकृष्णेन पृष्टः उपमन्युः प्रोवाच – श्वेतः, सुतारो, मदनः, सुहोत्रः, कङ्को, लौगाक्षिः, जैगीषव्यो, दधिवाहः, ऋषभो, मुनिः, उग्रः, अत्रिः, सुपालः, गौतमः, वेदशिराः,

गोकर्णः, गुहावासी, शिखण्डी, जटामाली, अट्टहासो, दारुको, लांगली, महाकायः, शूली, दण्डी, मुण्डीशः, सहिष्णुः, सोमशर्मा एते वर्तमानस्य वाराहकल्पस्य सप्तमे मन्वन्तरे युगक्रमानुसारं २८ योगचार्या बभूवुः। एषु प्रत्येकं शान्तचिताः चत्वारश्चत्वारः श्वेतादयो रुष्यन्ताः शिष्या अभूवन्। ते यथा – श्वेतः, श्वेतशिराः, श्वेताश्वः, श्वेतलोहितः, दुन्दुभिः, शतरूपः, ऋचीकः, केतुमान्, विकोशः, विपासः, पापनाशनः, सुमुखः, दुर्मुखः, दुर्गमः, दुरतिक्रमः, सनत्कुमारः, सनकः, सनन्दनः, सनातनः, सुदामा, विरजा, शंखः, अण्डजः, सारस्वतः, मेघः, मेघवाहः, सुवाहकः, कपिलः, आसुरिः, पञ्चशिखः, वाष्कलः, पराशरः, गर्गः, भार्गवः, अङ्गिराः, वलवन्धुः, निरामित्रः, केतुश्रृङ्गः, तपोधनः, लम्बोदरः, लम्बः, लम्बात्मा, लम्बकेशकः, सर्वज्ञः, समबुद्धिः, साध्यः, सिद्धिः, सुधामा, कश्यपः, वशिष्ठः, विरजा, अत्रिः, उग्रः, गुरुश्रेष्ठः, श्रवणः, श्रविष्ठकः, महानिलः, वाचश्रवा, सुवीरः, श्यावकः, यतीश्वरः, हिरण्यनाभः, कौशल्यः, लोकाक्षिः, कुक्षुभिः, सुमन्तुः, जैमिनिः, कुबन्धः, कुशकन्धरः, प्लक्षदार्भायणिः, केतुमान्, गौतमः, मल्लवी, मधुलिङ्गः, श्वेतकेतुः, उशिजः, बृहदश्वा, देवलः, कविः, शालिहोत्रः, सुवेशः, युवनाश्वः, शरद्वसुः, छागलः, कुम्भकर्णः, कुम्भः, प्रवाशुकः, उलूकः, वत्सः, कुशिकः, गर्गः, मिश्रकः, रुष्यश्चेत्येते द्वादशोत्तरशतसंख्याकाः ११२ योगाचार्यस्य शिष्या अभवन्। शिवपुराणस्य वायवीय संहितायां उत्तरार्धस्य ९ अध्याये –

एते शिष्या महेशस्य योगाचार्यस्वरूपिणः।
संख्या च शतमेतेषां सह द्वादशसंख्यया॥
सर्वे पाशुपताः सिद्धाः भस्मोद्धूलितविग्रहाः।
सर्वशास्त्रर्थतत्त्वज्ञा वेदवेदाङ्गपारगाः॥ (शिवपुराणम् ९।२१–२२)

एते सर्वे सिद्धाः पाशुपता भस्मभूषितशरीराः सर्वशास्त्रतत्त्वज्ञा वेदवेदाङ्गपारगाः शिवाश्रमेऽनुरक्ताः शिवज्ञानपरायणाः सर्वासक्तिविमुक्ताः शिवैकचिन्तनपराः, द्वन्द्वविमुक्ताः, धीराः सर्वहितकारिणः सरलाः कोमलस्वभावाः स्वस्थाः क्रोधशून्या रुद्राक्षधारिणः त्रिपुण्डविभूषितमस्तका जितेन्द्रियाश्च सन्ति। एषु केचन जटिला, केचन मुण्डिनः, केचिच्च शिखामात्रधारिणः फलमूलाहारकर्तारः प्राणायामपरायणा ध्यानरताः सन्ति। ये च योगाचार्यान् सशिष्यान् ज्ञात्वा भगवन्तं सदाशिवं समाराधयन्ति। ते शिवसायुज्यं लभन्ते –

समुन्मथितसंसारविषवृक्षाङ्करोद्गमाः।
प्रयातुमेव सन्नद्धाः परं शिवपुरं प्रति॥
सदेशिकानिमान् मत्वा नित्यं यः शिवमर्चयेत्।
स याति शिवसायुज्यं नात्र कार्या विचारणा॥ (शिवपुराणम् ९।२७–२८)

अपि च शतरुद्रसंहितायां वाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे युगप्रवृत्यनुसारं प्रथमे द्वापरे यदा भगवान् विष्णुः स्वयं व्यासरूपेणावतीर्णस्तदा भगवान् सदाशिवो ब्राह्मणानां हिताय श्वेतनामकमुनिस्वरूपेणावतरिष्यति। तस्मिन् समये शिखाधारिणश्छागले पर्वते श्वेत–श्वेतशिख–श्वेताश्व–श्वेतलोहितनामानश्चत्वारः शिष्या समुत्पद्यन्ते। तत्र ते मामविनाशिनं तत्त्वतोज्ञात्वा मद्भक्ता भूत्वा जन्मजरामृत्युरहिताः परब्रह्मसमाधौ लीना भविष्यन्ति।

द्वितीये द्वापरे प्रजापतिः सत्यो व्यासो भविष्यति तदाहं सुतारनाम्नाऽवतरिष्यामि। तत्रापि मम दुण्डिभि–

शतरूप–हृषीक–केत–मन्त्राख्याः चत्वारो वेदविदः शिष्या भविष्यन्ति। ते ध्यानयोगबलेन मां तत्त्वतो ज्ञात्वा मुक्ता भविष्यन्ति। तृतीये द्वापरे यदा भार्गवनामको व्यासो भविष्यति तदाहमपि दमननाम्नाऽवतरिष्यामि। तदा विशोक–विशेष–विपाप–पापनाशननामानः चत्वारो मे तनया भविष्यन्ति। तदाहः तैः सह व्यासस्य साहाय्यं करिष्यामि। कलियुगे प्रवृतिमार्गं सुदृढं करिष्यामि। चतुर्थे द्वापरे यदा अङ्गिरा व्यासो भविष्यति तदाहं सुहोत्रनाम्ना अवतरिष्यामि। तस्मिन् समये सुमुख–दुर्मुख–दुर्दम–तुरतिक्रमाख्याः योगसाधकाः चत्वारो महात्मनः पुत्राः भविष्यन्ति। तस्मिन्नपि अवसरेऽहं एभिः व्यासस्य साहाय्यं विधास्यामि। पञ्चमे द्वापरे यदा सविता व्यासो भविष्यति तदाहं कङ्कोनाम महातपस्वी यागी भविष्यति। तत्रापि मम चत्वारो योगसाधकाः सनकसनन्दनसनातनसनत्कुमारनामानः पुत्रा भविष्यति। तस्मिन्नवसरेऽहं व्याससाहाय्यं विधास्यन् निवृत्तिमार्गं वर्द्धयिष्यामि। षष्ठे द्वापरे प्रवृत्ति यदा मृत्युः व्यासो भूत्वा वेदान् विभजिष्यति तदाहं व्यासस्य सहायतार्थं लोकाधिनाम्ना प्रकटीभूय निवृत्तिमार्गस्योन्नतिं करिष्यामि। तत्रापि दृढव्रतिनो मे चत्वारः शिष्याः सुधामा विरजाः सञ्जयो विजयेश्चेति भविष्यति।

सप्तमे द्वापरे यदा शतक्रतुव्यासो भविष्यति तदाहं योगमार्गे निपुणः जैगीषव्र्यनाम्ना आविर्भविष्यति। काश्यां गुहायां दिव्यदेशे कुशासने उपविष्य योगं सुदृढं करिष्यामि व्यासस्य च साहाय्यं विधास्यन् भयेभ्यो भक्तानुद्धरिष्यामि। तदा मे सारस्वत–योगीशत–मेघवाहन–सुवाहननामानश्चत्वारः पुत्रा भविष्यन्ति।

अष्टमे द्वापरे यदा वेदविभजको बसिष्ठो व्यासो भविष्यति तदाहं दधिवाहननाम्नाऽवतरिष्यामि वासस्य साहाय्यं करिष्यामि। तदा कपिल–आसुरि–पञ्चशिख–शाल्वलपूर्वकाश्चत्वारो मत्समाना योगिनो भविष्यन्ति।

नवमे द्वापरे सारस्वतो व्यासो भविष्यति। तस्य निवृत्तिमार्गविवृद्धयर्थं ऋषभनाम्ना अवतरिष्यामि। पराशर–गर्ग–भर्गव–गिरिशनामानः चत्वारो महायोगिनो मे शिष्या भविष्यन्ति। तेषां साहाय्येन योगमार्गं सुदृढं विधास्यामि। दशमे द्वापरे त्रिधामा मुनिर्व्यासो भविष्यति। स हिमालयस्य रमणीये शिखरे भृगुतुङ्गे निवासं करिष्यामि। तथापि श्रुतिविदिता भृगु–बलबन्धु–नरमित्र–केतुभृङ्गनामानः चत्वारः पुत्राः भविष्यन्ति।

एकादशे द्वापरे यदा विवृत्तनाम व्यासो भविष्यति तदाहं गङ्गाद्वारे तपनाम्ना प्रकटी भविष्यामि। तत्रापि मम लम्बोदर–लम्बाक्ष–केशलम्ब–प्रलम्बकाख्या दृढव्रतिनः चत्वारः पुत्रा भविष्यन्ति।

द्वादशे द्वापरे शततेजा व्यासो भविष्यति तदाहं द्वापरस्यान्ते कलियुगारम्भे हेमकञ्चुके त्रिनाम्ना प्रादुर्भूय व्याससाहाय्यार्थं निवृत्तिमार्गं निवृत्तिमार्गं प्रतिष्ठास्यामि। तत्रापि सर्वज्ञ–समबुद्धि–साध्य–शर्मनामानः चत्वारो योगिन उत्तमा मे पुत्रा भविष्यन्ति। त्रयोदशे द्वापरे नारायणो व्यासो भविष्यति तदाहं गन्धमादनपर्वते वाल्यखिल्याश्रमे वलिनाम्ना उत्पत्स्यामि। तत्रापि सुधामा कश्यपो वशिष्ठो विरजा इति नामधेयाश्चत्वारः सुन्दराः पुत्रा भविष्यन्ति। चतुर्दशे द्वापरे यदा रक्षाव्यासो भविष्यति तदाऽङ्गिरसो वंशे गौतमनाम्ना आविर्भविष्यामि। तदा अत्रि–वशद–श्रवण–वनविकटाख्यश्चत्वारः पुत्रा भविष्यन्ति। पञ्चदशे द्वापरे यदा त्रय्यारुणिव्यासो भविष्यति तदाहं हिमालयपृष्टभागे स्थिते वेदतीर्थपर्वते सरस्वत्या उत्तरे तटे वेदशिरानाम्नाऽवतरिष्यामि। तत्र दृढपराक्रमिणः कुणि–कुणवाहु–कुशीर–कुनेलकाख्याश्चत्वारः पुत्रा भविष्यन्ति।

षोडशे द्वापरे यदा देवो व्यासो भविष्यति। तदाहं योगप्रदानाय पुण्ये गोकर्णवने गोकर्णनामा उत्पत्स्यामि तत्र

काश्यप–उशनः–यवश–वृस्पतयः चत्वारो योगिनः पुत्रा भविष्यन्ति। एते जलवन्निर्मला योगिनो भविष्यन्ति। तेनैव मार्गेण शिवलोकं प्रयास्यन्ति। सप्तदशे द्वापरे देवकृतञ्जयो व्यासो भविष्यति। तस्मिन् समये हिमालयोच्चशिखरे महालयपर्वते गुहानिवासी नाम्नाऽवतरिष्यामि। तत्रोतथ्य–वामदेव–महायोग–महालननामानः पुत्रा भविष्यन्ति। अष्टादशे द्वापरे ऋतञ्जयो व्यासो भविष्यति। तदाहं हिमालयस्य सुन्दरे शिखरे विराजमाने शिखण्डिपर्वते सिद्धक्षेत्रं सिद्धसेवितं शिखण्डिवनं विद्यते। तत्र शिखण्डिनाम्ना उत्पत्स्यामि तत्रापि वाचःश्रयो रुचीक–श्यावास्य–यतीश्वरनामानश्चत्वारः तपस्विनः पुत्राः भविष्यन्ति। एकोनविंशे द्वापरे भरद्वाजो व्यासो भविष्यति तदा हिमालयशिखरे मालिनाम्ना उत्पत्स्यामि मम शिरसि बृहती जटा भविष्यति। तत्र सागरवद्धीरस्वभावाः हिरण्यनाभ–कौशल्य–लोकाक्षि–प्रधिनिनामानः पुत्रा भविष्यन्ति। विंशे द्वापरे गौतमो व्यासो भविष्यति। तदाहं हिमवत्पृष्टे देवमानवचारण यक्षसिद्धसेविते अट्टहारनाम्ना अवतरिष्यामि, तत्रोत्तमयोगसम्पन्नाः सुमन्त–वर्वरि–कबन्ध–कुश्यकन्धरनामानश्चत्वारः पुत्रा भविष्यन्ति। एकविंशे द्वापरे यदा वचःश्रवा व्यासो भविष्यति। तदाहं दारुकनाम्नाऽवतरिष्यामि। अतस्तस्य स्थानस्य नाम दारुकवनं भविष्यति। तत्रापि मम प्लक्षो दार्भायणिः केतुमान् गौतमश्चेति चत्वारः परमयोगिनः पुत्रा भविष्यन्ति। द्वाविंशे द्वापरे शुष्मायणो व्यासो भविष्यति यदा लाङ्गलीचीमनाम्ना मुनिरूपेऽवतरिष्यामि। तदा मे मल्लवी–मधुपिंग–श्वेतकेतुरिति चत्वारः परम धार्मिकाः पुत्रा भविष्यन्ति। त्रयोविंशे द्वापरे तृण्विन्दुः व्यासो भविष्यति। तदाहं सुन्दरे कालिञ्जरे गिरौ श्वेतनाम्नाऽवतरिष्यामि। तत्र ममोशिक–वृहदश्व–देवल–कविनामानश्चन्वारः पुत्रा तपस्विनो योगिनो भविष्यन्ति। चतुर्विंशे द्वापरे ऐश्वर्यशाली यक्षो व्यासो भविष्यति। तदाहं नैमिषारण्ये शूलिनाम्ना महायोगी भूत्वाऽवतरिष्यामि। तदा शालिहोत्र–अग्निवेश–युवनाश्व–शरद्वसुनामानस्तपस्विनश्चत्वारः शिष्या भविष्यन्ति।

पञ्चविंशे द्वापरे शक्तिनामा व्यासो भविष्यति। तदाहं मुण्डिश्वरनाम्ना प्रसिद्धो महायोगी भविष्यामि। तस्मिन्नवसरे छागल–कुण्डकर्ण–कुम्भाण्ड–प्रभावकनामानः तपस्विनो मे शिष्या भविष्यन्ति। षड्विंशे द्वापरे पराशरो व्यासो भविष्यन्ति। तदाहं वलभद्रे नगरे सहिष्णुनाम्नाऽवतरिष्यामि। तत्रोलूक–विद्यूत्–शम्बूक–आश्वलायननामानश्चत्वारः तपस्विनः शिष्या भविष्यन्ति। सप्तविंशे द्वापरे यदा जातुकर्णी व्यासो भविष्यति तदाहं प्रभासतीर्थे सोमशर्मानाम्ना प्रकटिष्यामि तत्राक्षपाद–कुमार–उलूक–वत्सनामानः तपस्विनश्चत्वारः शिष्याः भविष्यन्ति। अष्टाविंशे द्वापरे श्रीहरिः पाराशरस्य पुत्ररूपेणावतीर्णो भविष्यति। पुरुषोत्तम–श्रीकृष्ण–वासुदेवरूपेणावतरिष्यति। तदाहमपि लोकान् साश्चर्यान् कर्तुं योगमायाप्रभावेण ब्रह्मचारिरूपेणावतरिष्यामि। पुनश्मशानभूमौ अविच्छिन्नं मृतशरीरं दृष्ट्वाऽहं ब्राह्मणानां हितसाधनाय योगमायाश्रित्य विष्णुना सह मेरुगिरौ दिव्यगुहायं प्रविष्य मम नाम लकुलीशो भविष्यति। एवं मम कायावतारः उत्कृष्टं क्षेत्रं भविष्यति। यावद्धरास्थास्यति तावत् लोके परमं विख्यातं भविष्यन्ति। तत्र मे परमतपस्विनश्चत्वारः शिष्या कुसिक–गर्व–मित्र पौरुष्या भविष्यन्ति। एते वेदापरायणपराः ऊर्ध्वरेतसो ब्राह्मणा योगिनो भविष्यन्ति माहेश्वरं योगं प्राप्य शिवलोके गमिष्यन्ति।

एवं भगवता शिवेन वाराहकल्पीयवैवश्वतमन्वन्तरस्य योगिनां सम्यग् निरूपणं कृतमस्ति। एते २८ व्यासा क्रमशः प्रतिद्वापरं भविष्यन्ति। योगेश्वरावताराश्च प्रतिकलियुगप्रारम्भे भविष्यन्ति। प्रत्येकं योगेश्वरावतारैः सह तेषां चत्वारः शिष्याः महान्तः शिवभक्ताः योगमार्गवृद्धिकराश्च भविष्यन्ति। एते पशुपतिशिष्या लिप्तभस्माङ्गाः त्रिपुण्ड्रालङ्कृतललाटाः रुद्राक्षमालाधारिणो वेदवेदाङ्गपारगाः सर्वदा लिङ्गार्चनतत्पराः शिवमासक्ता योगनिष्ठा

जितेन्द्रियाश्च भविष्यन्ति। वैवस्वतमन्वन्तरस्यादितः अष्टाविंशतियुगक्रमानुसारं कृष्णावतारपर्यन्तं ११२ योगाचार्यां भविष्यन्तीति भगवान् महेश्वरो ब्रह्मणं प्रति वर्णयित्वाऽन्तर्हितो जातः। श्रीशिवमहापुराणे शतरुद्रसंहितायां –

व्यासाश्चैवाष्टविंशत्का द्वापरे द्वापरे विभो।
योगेश्वरावताराश्च प्रारम्भे च कलौ कलौ॥ (शिवमहापुराणम् ५।५२)
योगेश्वरावताराणां योगमार्गप्रवर्द्धकाः।
महाशैवाश्च चत्वारः शिष्याः प्रत्येकमव्ययाः॥ (शिवमहापुराणम् ५।५३)
भक्त्या मयि च योगेन ध्याननिष्ठा जितेन्द्रियाः।
संख्यया द्वादशधिक्यशतं च गणिता बुधैः॥ ( शिवमहापुराणम् ५।५६)

किञ्च शिवपुराणस्य वायवीयसंहितायां उत्तरखण्डे ४० अध्याये पुरा सनत्कुमारो ज्ञानवशादात्मानं योगीन्द्रं मन्यमानो दुर्विनीतया कदाचित् सम्मुखे आयान्तं भगवन्तं सदाशिवं दृष्ट्वाऽपि समुचिताभ्युत्थानादिना सम्मानं न कृतवान्, किन्तु स्वस्थान एवोपविष्ट आसीद्। तस्य तेनापराधेन कुपितो नन्दी उष्ट्रयोनिं प्राप्तुं शशाप। तदर्थं शोकाकुलेन ब्रह्मणा भगवन्तमाशुतोषं सदाशिवं जगदम्बां शिवां नन्दिनश्चानुनीय कथंचित् तस्योष्ट्रता निवारिता यथा पूर्ववत् सनत्कुमारता च प्रापिता। (शिवमहापुराण ३९।४२।४९)

## निष्कर्षः

वस्तुतस्तु प्रत्येकं शास्त्राणां मुख्यतया प्रतिपाद्या विषयाः पृथक् पृथग् भवन्ति। पुराणवाङ्मये वहुनामेवं विधानां विद्यानां सङ्केतो विवरणानि चोपलभ्यन्ते, याश्च विद्या इदानीमपि विस्मयमावहन्ति नितराम्। अलौकिककर्मणां विशिष्ट उल्लेखोऽपि पुराणानामेकं वैशिष्ट्यं बिभर्ति। एवं शैवदर्शने भक्तिरसस्वरूपः विषय सन्दर्भे माहेश्वरसाधनमार्गे वामाचारस्योत्तरोत्तरह्रासेन शिवतत्त्वस्य क्रमिकविकासेन च माहेश्वराणां कापालिकः, कालदमनम्, पाशुपतः, शैवश्चेति मतचतुष्टयं प्रचलितम्। उपासनापद्धतेः पार्थक्येन तेषां मतानां दार्शनिकस्वरूपं भेदं लभते। पुराणानि सन्ति अस्माकं संस्कृतेः समस्तानां विद्यानाञ्च आकरः। तत्र स्थाने स्थाने यौगिकप्रक्रियाया योगसिद्धेश्चापि समुल्लेखो विद्यते। योगदर्शनस्य प्रायः सर्वे विषयाः सन्ति प्रायोगिकाः। अतो दर्शनमिदं सर्वदेव आस्तिकनास्तिकैः समानं समाद्रियते। प्राचीने अनेके संस्कृतवाङ्मये योगशब्दो विभिन्नेषु व्यापकेषु अर्थेषु व्यवह्रियते। अतो योगशब्दो हि न केवलं चित्तवृत्तिनिरोधार्थक एव, अपितु बहुषु अर्थेषु योगशब्दस्य वृत्तिः। शिवपुराणानुसारेण मन्त्रयोगः, स्पर्शयोगः, भावयोग, अभावयोगः महायोगश्चेति पञ्चधा योगः कथित। एवं योगाचार्याणामितिहासेऽपि शिवपुराणस्य वायवीयसंहितायां उत्तराद्र्धस्य नवमे अध्याये भगवतः शिवस्य केऽवतारा भवन्ति के च तेषां शिष्याः सन्तीत्याकांक्षायां द्वादशोत्तरशतसंख्यकाः ११२ योगाचार्यस्य महेश्वरस्य शिष्या सन्तीति स्पष्टम्। तथैव शिवस्य मूर्तिसम्बन्धे शिवपुराणे वायवीयसंहितायामुत्तरभागे तृतीयोऽध्याये अष्टमूर्तयो वर्णिताः सन्ति। तस्य देवादिदेवस्याष्टमूर्तिमयं निखिलमिदं जगदष्टमूर्तिभिः सूत्रं मणिगणैरिव व्याप्तं वर्तते।

## कृतज्ञताज्ञापनम्

प्रस्तुतेऽस्मिन् आलेखप्रतिपादनक्रमेऽनुसन्धानात्मकालेखगतप्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं प्रकटयामि । अथ चालेखमिदमाद्यन्तं सूक्ष्मेक्षिकया सम्परीक्ष्य यथावश्यकं परामर्शदातृभ्यो गुरुभ्योऽपि हार्दिकी कृतज्ञतां व्यनज्मि ।

## सन्दर्भग्रन्थसूची

वेदव्यासः (वि.सं.२०५५), देवीभागवतमहापुराणम् (सप्तमसंस्करणम्), गोरखपुर : गीताप्रेस ।

वेदव्यासः (सन् १९८६), शिवमहापुराणम्, वाराणसी : चौखम्बा विद्याभवन ।

महेश्वरानन्दः (सन् १९९२), महार्थमञ्जरी, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालयः ।

योगीन्द्रः, स्वात्मारामः (वि.सं. २०५५), हठयोगप्रदीपिका, गोरखपुर : गोरखनाथ मंदिर ।

द्विवेदी, हजारी प्रसाद (१९५०), नाथसम्प्रदाय, इलाहाबाद : हिंदुस्तानी एकेडेमी ।

आचार्यः, शंकरः (सन् १९८५), सौन्दर्यलहरी, दिल्ली : ईस्टर्न बुक लिंकर्स ।द (सप्तमसंस्करणम्) गोरखपुर : गीताप्रेस ।